# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्री-२ ( Sem_4 )** | **प्रश्नपत्र-६** | **गुणाः - ७०** |
| **विषयः - धर्मशास्त्रम्** | CC 2.4.8 | **समयः - ०३:०० तः ०६:००** |
| **दिनाङ्कः** - 23/04/2016 | **सन्दर्भग्रन्थः - मनुस्मृति-मन्वर्थटीकासहित-अध्यायाः-७-८** | |

---

**विभागः - १**

**प्रश्न-१ द्वयोः प्रसङ्गपूर्वकं व्याख्या कार्या ।** ०८

१. तस्य सर्वाणि भूतानि स्थावराणि चराणि च । भयाद् भोगाय कल्पन्ते स्वधर्मान् न चलन्ति च ॥

२. यस्य राज्ञस् तु विषये श्रोत्रिय सीदति क्षुधा । तस्याऽपि तत् क्षुधा राष्ट्रमचिरेणैव सीदति ॥

३. विषघ्नैरगदैश् चाऽस्य सर्वद्रव्याणि योजयेत् । विषघ्नानि च रत्नानि नियतो धरयेत् सदा ॥

**प्रश्न-२ कस्यापि एकस्य सविस्तरमुत्तरं लिखत ।** ०८

१. मनुस्मृत्यनुसारं दण्डव्यवस्थां विचयत ।

२. न्यायवर्तिनः राजानः कीदृशाः भवन्ति?

**प्रश्न-३ टिप्पणीद्वयं लिखत ।** ०४

१. राजधर्माः ।

२. राजद्वेषनिन्दा ।

३. दण्डप्रणयनम् ।

४. विनयग्रहणम् ।

**प्रश्न-४ पञ्चानां लघूत्तरं लिखत ।** ०५

१. दशव्यसनानि कानि?

२. दण्डदाने कः क्षमः?

३. लोकः केन जितः?

४. राजधर्मस्य वर्णनं कस्मिन् अध्याये?

५. दूतस्य कार्यं किम्?

६. व्यसनाधीनः क्व गच्छति?

७. प्रजाः वशे कर्तुं समर्थः?

**विभागः - २**

**प्रश्न-५ द्वयोः श्लोकयोः ससन्दभप्रसङ्गं संस्कृते व्याख्या कार्या ।** ०८

१. यस्मिन् देशे निषीदन्ति विप्रा वेदविदस् त्रयः । राज्ञश् चाधिकृतो विद्वान् ब्राह्मण तां सभां विदुः ॥

२. सत्येन पूयते साक्षी धर्मः सत्येन वर्धते । तस्मात् सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥

३. सत्येन शापयेद् विप्रं क्षत्रियं वाहनाऽऽयुधैः । मोबीजकाञ्चतैर् वैश्यं शूद्रं सर्वस्तु पातकैः ॥

**प्रश्न–६ एकस्य सविस्तरेण उत्तरं लिखत।** **०८**

१. अधर्मजये सभासदां दोषान् वर्णयत।

२. विदुषा ब्राह्मणेन कीदृशैः सभ्यैः सह कार्यं दृष्टव्यम्?।

**प्रश्न–७ एकां टिप्पणी लिखत।** **०२**

१. परनिधिविषये अनृतकथने दण्ड :।

२. बार धनं राज्ञा रक्षणीयम्।

**प्रश्न–८ द्वयोः अतिलघूत्तरं लिखत।** **०२**

१. मिथ्यासाक्ष्ये दोषः।

२. सत्यं कैः वक्तव्यम्?

३. असत्यकथनफलम्।

४. वृथाशपथे दोषः।

## विभागः – ३

**प्रश्न–९ द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या।** **०८**

१. सीमायामविषह्यायां स्वयं राजैव धर्मवित्। प्रदिशेत् भूमिमेतेषामुपकारादिति स्थितिः॥

२. यानस्य चैव यातुश् च यानस्वामिन् एव च। दशाऽतिवर्तनान्याहुः शेषे दण्डोविधीयते॥

३. आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः। न विब्रूयान् नृपो धर्मं चिकीर्षतन् हितमात्मनः॥

**प्रश्न–१० एकस्य सविस्तरेणोत्तरं लिखत।** **०८**

१. स्त्रीसङ्ग्रहणे दण्डः – ग्रन्थाधारेण लिखत।

२. मनुस्मृत्यनुसारं दण्डं विवेचयत।

**प्रश्न–११ टिप्पणीद्वयं लिखत।** **०४**

१. दण्डपारुष्यम्।

२. वनस्पतिच्छेदने दण्डः।

३. द्रव्यहिंसायां व्यवस्था।

४. अर्धस्थापनम्।

**प्रश्न–१२ पञ्चानां लघूत्तराणि लिखत।** **०५**

१. पाल – इति शब्दस्य कोऽर्थः?

२. तन्तुवायः किं करोति?

३. सुवर्णशब्दस्य पर्यायवाची शब्दः कः?

४. आत्मा कस्य साक्षी अस्ति?

५. सत्येन कः पूर्यते?

६. चन्द्रसालोक्यं कः प्राप्नोति?

७. यानदाता कां प्राप्नोति?